# mAtRRibhUteshvara 108 nAmAvaliH praising Ramana Maharshi's mother

# માતૃભૂતેશ્વરાષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : mAtRRibhUteshvarAShTottarashatanAmAvalI

File name : mAtRRibhUteshvarAShTottarashatanAmAvalI.itx

Category : aShTottarashatanAmAvalI, deities_misc, nAmAvalI

Location : doc_deities_misc

Author : Shantananda Swami

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, PSA Easwaran

Description-comments : Audio (Dr. Lingeshvara Rao) on Ramanashrama CD - Parayana

Acknowledge-Permission: Sri V.S. Ramanan, President, Sri Ramanasramam sriramanamaharshi.org

Latest update : July 7, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# mAtRRibhUteshvara 108 nAmAvaliH praising Ramana Maharshi's mother

# માતૃભૂતેશ્વરાષ્ટોત્તરશતનામાવલિઃ

ૐ શ્રીમાતૃભૂતેશ્વરરૂપિણ્યૈ નમઃ ।

ૐ શ્રીરમણજનન્યૈ નમઃ ।

ૐ આવર્તપુરવાસિન્યૈ નમઃ ।

ૐ અલગમ્માનામ્ન્યૈ નમઃ ।

ૐ સુન્દરાર્ય સહધર્મિણીભૂતાયૈ નમઃ ।

ૐ શ્રીજીવન્મુક્તપુત્રકૃતાર્થીકૃતજીવનાયૈ નમઃ ।

ૐ શ્રીયોગામ્બિકાસ્વરૂપિણ્યૈ નમઃ ।

ૐ શ્રીચક્રાઙ્કિત શ્રીવિદ્યાસ્વરૂપિણ્યૈ નમઃ ।

ૐ લોકમાત્રે નમઃ ।

ૐ વિશ્વવન્દ્યાયૈ નમઃ । ૧૦

ૐ સ્કન્દમાત્રે નમઃ ।

ૐ ધન્યાયૈ નમઃ ।

ૐ સ્વગૃહનિર્ગતપુત્રાકુલચિત્તાયૈ નમઃ ।

ૐ પુત્રાન્વેષણનિયુક્તબન્ધુજનાયૈ નમઃ ।

ૐ નિરાકૃતસ્વગૃહવૈભવાયૈ નમઃ ।

ૐ સ્વેચ્છાસ્વીકૃતદૈન્યજીવનાયૈ નમઃ ।

ૐ સ્વીકૃતારુણાચલવાસાયૈ નમઃ ।

ૐ પુત્રપ્રત્યાગમનાર્થકૃતવ્યર્થપ્રયત્નાયૈ નમઃ ।

ૐ ભૂમિનાથપ્રસાદોપલબ્ધસન્તત્યૈ નમઃ ।

ૐ યોગામ્બાસમેતારુણાચલેશ્વરકૃપાપાત્રાયૈ નમઃ । ૨૦

ૐ તપસ્વિન્યૈ નમઃ ।

ૐ પુત્રશિક્ષિત વૈરાગ્યાયૈ નમઃ ।

ૐ ઇતરમતસ્થસમદર્શનાયૈ નમઃ ।

ૐ પુત્રોપદેશનિર્મુક્તસ્પૃશ્યાસ્પૃશ્યાદિ

સઙ્કુચિતપુરાતનાચારાયૈ નમઃ ।
ૐ પુત્રોપદેશપ્રાપ્તસ્વરૂપજ્ઞાનાયૈ નમઃ ।
ૐ શ્રીરમણરચિત અપ્પલગીતમૂલકારણાયૈ નમઃ ।
ૐ શ્રીરમણપ્રીતિકરભોજનરચનાકુશલાયૈ નમઃ ।
ૐ વિદિતરમણપ્રભાવાયૈ નમઃ ।
ૐ વિવિધવેદાન્તપરદ્રાવિડભાષાગીતજ્ઞાયૈ નમઃ ।
ૐ કપિલોપદેશકૃતાર્થીકૃતદેવહૂતિસમાનાયૈ નમઃ । ૩૦
ૐ શ્રીરમણસ્તુતિતુષ્ટારુણાચલેશ્વરકૃપાવિગતજ્વરાયૈ નમઃ ।
ૐ શ્રીરમણકૃપાસ્પદાયૈ નમઃ ।
ૐ શ્રીરમણાર્પિતપ્રાણાયૈ નમઃ ।
ૐ શ્રીરમણપદાનુગાયૈ નમઃ ।
ૐ શ્રીરમણસેવાતત્પરાયૈ નમઃ ।
ૐ શ્રીરમણોપદેશશ્રવણશુદ્ધીકૃતચિત્તાયૈ નમઃ ।
ૐ શ્રીરમણહસ્તપ્રાપિતમોક્ષસામ્રાજ્યાય નમઃ ।
ૐ શ્રીરમણાનુરક્તહૃદયાયૈ નમઃ ।
ૐ શ્રીરમણહસ્તપ્રતિષ્ઠાપિતમહામેરુયન્ત્રસ્વરૂપિણ્યૈ નમઃ ।
ૐ શ્રીરમણજ્ઞાનાગ્નિદગ્ધકલ્મષાયૈ નમઃ । ૪૦
ૐ શ્રીરમણભક્તજનપ્રિયાયૈ નમઃ ।
ૐ શ્રીભગવત્સઙ્ગવિનષ્ટાહઙ્કારાયૈ નમઃ ।
ૐ શ્રીરમણાશ્રિતાયૈ નમઃ ।
ૐ શ્રીરમણયશોગાનહર્ષિતાયૈ નમઃ ।
ૐ શ્રીરમણસ્મરણરતાયૈ નમઃ ।
ૐ શ્રીરમણહસ્તસ્પર્શમુક્તદેહાયૈ નમઃ ।
ૐ શ્રીરમણમહિમાલબ્ધમોક્ષાયૈ નમઃ ।
ૐ શ્રીરમણચરણશરણાયૈ નમઃ ।
ૐ શ્રીરમણનિકટવાસશાન્તતાપાયૈ નમઃ ।
ૐ શ્રીરમણદર્શનમાત્રસન્તુષ્ટમાનસાય નમઃ । ૫૦
ૐ શ્રીમદ્રમણકરુણાકટાક્ષનિરસ્તાજ્ઞાનાન્ધકારાયૈ નમઃ ।
ૐ શ્રીબાહ્યાડમ્બરવિવર્જિતાયૈ નમઃ ।
ૐ અનવદ્યાયૈ નમઃ ।
ૐ મૃદુભાષિણ્યૈ નમઃ ।
ૐ સરલસ્વભાવાયૈ નમઃ ।

ૐ શ્રીસ્વમૈત્રીવશીકૃતસર્વજનાયૈ નમઃ ।

ૐ નિઃસ્પૃહાયૈ નમઃ ।

ૐ મિતભાષિણ્યૈ નમઃ ।

ૐ ત્યક્તસર્વૈષણાયૈ નમઃ ।

ૐ નૈસર્ગિકભગવદ્ભક્તિયુતાયૈ નમઃ । ૬૦

ૐ નિર્મમાયૈ નમઃ ।

ૐ નિરહઙ્કારાયૈ નમઃ ।

ૐ તિતિક્ષાપૂર્ણાયૈ નમઃ ।

ૐ સત્ત્વગુણાન્વિતાયૈ નમઃ ।

ૐ કીર્તનીયતમાયૈ નમઃ ।

ૐ સર્વે દેવીસ્વરૂપિણ્યૈ નમઃ ।

ૐ ધ્યેયાયૈ નમઃ ।

ૐ નિર્વિકારાયૈ નમઃ ।

ૐ નિષ્કલઙ્કાયૈ નમઃ ।

ૐ પ્રશાન્તમુખમણ્ડલાયૈ નમઃ । ૭૦

ૐ તેજોવત્યૈ નમઃ ।

ૐ જિતેન્દ્રિયાયૈ નમઃ ।

ૐ કાષાયામ્બરધરાયૈ નમઃ ।

ૐ આભૂષણવિરહિતાયૈ નમઃ ।

ૐ સ્વસુખનિરભિલાષાયૈ નમઃ ।

ૐ સંસારપાશનિર્મુક્તાયૈ નમઃ ।

ૐ પૂર્વજન્મસઞ્ચિતપુણ્યપુઞ્જાયૈ નમઃ ।

ૐ શુભકર્મપ્રાપ્તજીવન્મુક્તપુત્રાયૈ નમઃ ।

ૐ રમણીયગુણાન્વિતાય નમઃ ।

ૐ રાગદ્વેષાદિદોષવિરહિતાયૈ નમઃ । ૮૦

ૐ શાન્તિનિલયાયૈ નમઃ ।

ૐ કાવ્યકણ્ઠગણપતિમુનિવર્ણિત-
બુધ્દરામચન્દ્રાદ્યવતારજનન્યપેક્ષા-
શ્રેષ્ઠતરવૈભવાયૈ નમઃ । extra

ૐ સ્વકુલાચારાનુષ્ઠાનરતાયૈ નમઃ ।

ૐ સૌભાગ્યશાલિન્યૈ નમઃ ।

ૐ વાત્સલ્યપરિપૂરિતાયૈ નમઃ ।

ૐ દક્ષિણામૂર્તિસ્તોત્રપ્રિયાયૈ નમઃ ।
ૐ તુલસી અમ્મા લબ્ધમહાવાક્યદીક્ષાયૈ નમઃ ।
ૐ શ્રીરમણકૃપાનિરસ્તમાયાજાલાયૈ નમઃ ।
ૐ વિમલાયૈ નમઃ ।
ૐ વીતહર્ષશોકાદિદ્વન્દ્વાયૈ નમઃ ।
ૐ રમણમહર્ષિમાન્યાયૈ નમઃ । ૯૦
ૐ મહાશક્તિસ્વરૂપિણ્યૈ નમઃ ।
ૐ અન્તિમકાલાનુભવક્ષીણવાસનાસમૂહાયૈ નમઃ ।
ૐ અનઘાયૈ નમઃ ।
ૐ અરુણાચલકૃતાધિવાસાયૈ નમઃ ।
ૐ કલિદોષવિવર્જિતાયૈ નમઃ ।
ૐ મઙ્ગલદાત્ર્યૈ નમઃ ।
ૐ રમણમઙ્ગલાયૈ નમઃ ।
ૐ ચાપલ્યરહિતાયૈ નમઃ ।
ૐ શ્રીરમણકરુણાવલમ્બનાયૈ નમઃ ।
ૐ ભીષણભુજગમાલાવિભૂષિતશિવરૂપદર્શિતપુત્રાયૈ નમઃ । ૧૦૦
ૐ સદ્ગુરુરમણલબ્ધોપદેશાયૈ નમઃ ।
ૐ શ્રીરમણલબ્ધપૌત્રપ્રાપ્તિવરાયૈ નમઃ ।
ૐ શ્રીરમણહસ્તાભિષિક્તજલસ્નાતાયૈ નમઃ ।
ૐ ઉદારહૃદયાયૈ નમઃ ।
ૐ એચમ્માકૃતસત્કારાયૈ નમઃ ।
ૐ ક્ષણાર્ધભગવદ્વિરહનિરપેક્ષાયૈ નમઃ ।
ૐ શ્રીનિરઞ્જનાનન્દસ્વામિકૃત-શ્રદ્ધાયુક્ત-પ્રયત્ન
બહુલ-ફલસ્વરૂપનિર્મિતમાતૃભૂતેશ્વરાધિષ્ઠિત-
સમાધિમન્દિરાયૈ નમઃ । extra
ૐ માતૃગૌરવ વિશેષાદર નિરપેક્ષાયૈ નમઃ ।
ૐ શ્રીભગવદ્રમણજ્યોતિલીનાયૈ નમઃ । ૧૦૮

ૐ સર્વં શ્રીરમણાર્પણમસ્તુ ॥

Encoded by Sunder Hattangadi

Proofread by Sunder Hattangadi, PSA Easwaran

*mAtRRibhUteshvara 108 nAmAvaliH praising Ramana Maharshi's mother*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*